[1]खलपूः-खलप्वौ-खलप्वः;  —  —  —

[2]पूतम्-तः-तवान्-[3]पूनः-पूनवान् (यवः), पावितः, पुपूषितः, पोपूयितः-तवान्;

पवः-[4]पवनः, [5]पुपविवान्, [6]पवित्रम् (अग्निः, देवता वा), [7]पोता, पावः,

[8]पावनः[A], पुपूषुः, [9]पिपावयिषुः, पोपुवः;

पवितव्यम्, पावयितव्यम्, पुपूषितव्यम्, पोपूयितव्यम्;

[10]प्रपवनीयम्, [11]प्रपावनीयम्, पुपूषणीयम्, पोपूयनीयम्;

[12]विपूयः, पव्यम्-[B]अवश्यपाव्यम्, पाव्यम्, पुपूष्यम्, पोपूय्यम्;

पूयमानः, पाव्यमानः, पुपूष्यमाणः, पोपूय्यमानः;

पावः, [13]निष्पावः, [14]निष्पावः, [15]उत्पावः,

---

1. खलं पुनातीति खलपूः। क्विपि रूपमेवम्। द्विवचनादौ, 'ओः सुपि' (6-4-83) इति यण्।
2. 'श्र्युकः किति' (7-2-11) इति निष्ठायामिण्निषेधः। एवं क्तिनि, क्त्वायाम्, ल्यपि चेण्निषेधो ज्ञेयः।
3. ल्वादित्वेन नित्यं निष्ठानत्वे प्राप्ते, 'पूञो विनाशे' (वा. 8-2-44) इत्यर्थविशेषे निष्ठानत्वम्। पूनाः यवाः। विनष्टाः इत्यर्थः।
4. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्ययः।
5. लिटः क्वसौ, द्विर्वचने, इडागमे, उत्तरखण्डे गुणे, 'न शसददवादिगुणानाम्' (6-4-126) इति न एत्वाभ्यासलोपः।
6. 'कर्तरि चर्षिदेवतयोः' (3-2-186) इति कर्तरि, करणे च इत्रप्रत्ययः।
7. 'तृन्' (3-2-135) इति कर्तरि तच्छीलादिषु तृन्प्रत्ययः। बाहुलकादिडागमो न।
8. ण्यन्तादस्मात् नन्द्यादित्वात् कर्तरि ल्युप्रत्ययः।
9. ण्यन्तादस्मात् सनि, उप्रत्यये, 'ओः पुयण्—' (7-4-80) इत्यभ्यासस्येकारः।
10. 'न भाभूपूकमि—' (8-4-34) इति णत्वनिषेधः।
11. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति णत्वनिषेधः।
12. 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इति मुञ्जेऽभिधेये क्यपि रूपमेवम्।
13. 'निरभ्योः पूल्वोः' (3-3-28) इति निष्पूर्वकादस्मात् घञ्प्रत्ययः। निष्पावः=धान्यविशेषः।
14. 'परिमाणाख्यायां सर्वेभ्यः (3-3-20) इति घञ्। निष्पावः=शूर्पः। निष्पूयते= शोध्यते तुषाद्यपनयनेन यस्तण्डुलादिः सः निष्पावः। शूर्पस्यापि प्राक्काले परिमाणवाचकत्वात् प्रत्ययोत्पत्तिरिति ज्ञेयम्।
15. 'उदि श्रयतियौतिपूद्रुवः' (3-3-49) इति भावे घञ्।

A. 'दक्षिणीयमवगम्य पङ्क्तिशः पङ्क्तिपावनमथ द्विजव्रजम्।' शि. व. 14.33.

B. 'अवश्यपाव्यं पवसे कच्चित् त्वं देवभाक् हविः।' भ. का. 6.65.